# पुणना International School
## Shree Swaminarayan Gurukul, Zundal

| Student Name | | | | MARKS | 80 |
|---|---|---|---|---|---|
| | | Grade | X | Roll No. | |
| Subject | SANSKRIT | PRE-BOARD EXAM | | Teacher's Sign | |

## 'अ'- भागः

## (बहुविकल्पात्मकाः प्रश्नाः)

## अनुप्रयुक्त- व्याकरणम

**प-1 अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत-(केवलं प्रश्नचतुष्टयम)** **[4-MARKS]**

क- अयोग्यः पुरुषः नास्ति योजकः+तत्र दुर्लभः।

(क)योजकस्तत्र (ख) योजक तत्र (ग) योजकश्तत्र

ख- आलस्यं हि मनुष्याणां शरीरस्थः+महान रिपुः।

(क)शरीरस्थो महान (ख) शरीरस्थ महान (ग) शरीरस्थमहान

ग- किञ्चित कालं नय माम अस्मात + नगराद बहुदूरम।

(क)योजकस्तत्र (ख) योजक तत्र (ग) योजकश्तत्र

घ- अचिरादेव चण्डवातेन मेघरवैश्व सह प्रवर्षः समजायत।

(क)अचिराद+एव (ख) अचिरात+एव (ग) अचिराद+एव

ङ- कश्चित कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन आसीत।

(क)कश+चित (ख) क+श्चित (ग) कः+चित

**प्र-2 अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रह वा प्रदत्तविकल्पेभ्यः चिनुत-**

**(केवलं प्रश्नचतुष्टयम)** **[4-MARKS]**

क- वाक्पटुः केनापि प्रकारेण परैर्न परिभूयते।

(क)वाचःपटुः (ख) वाक पटुः (ग) वाचि पटुः

ख- हयाः च नागाः च वहन्ति बोधिताः।

(क)हयनागाः (ख) हयानागौ (ग) हयानागाश्व

ग- वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति।

(क)वृक्ष उपरि (ख)वृक्षस्य उपरि (ग) वृक्षे उपरि

घ- सर्वेषामेव मत्कृते महत्वं विद्यते समयम अनतिक्रम्य।

(क)यथासमयम (ख) यथासमयः (ग) उपसमयम

ङ- प्रकृतिमाता (सस्नेहम)-भोः भोः प्राणिनः! यूयं सर्वे एव मे सन्ततिः।

(क)स्नेहस्य सहितम (ख) स्नेहेन सहितम (ग) स्नेहेस्य अभावः

**प्र-3 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम)** **[4-MARKS]**

क- सर्वेषामेव मत्कृते महत+त्व विद्यते।

(क)महत्ता (ख) महत्वम (ग) महत्तवम

ख- विद्वांसः एव लोकेऽस्मिन चक्षुष्मन्तः प्रकीर्तिताः।

(क)चक्षुस+मतुप (ख) चक्षुष+मतुप (ग) चक्षुः+मतुप

ग- तस्य भार्या बुद्धि+मतुप पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

(क)बुद्धिमान (ख) बुद्धिमती (ग) बुद्धिमत

घ- विचित्रा दैवगतिः।

(क)विचित्र+टाप (ख) विचित्र+ङीप (ग) विचित्र+त्व

**अथवा**

जम्बुकः - स्वामिन ! यत्रास्ते सा धूर्ता तत्र गम्यताम।

(क)धूर्त+तल (ख) धूर्त+टाप (ग) धूर्त+त्व

**प्र-4 वाच्यस्य नियमानुगुणम उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम)** **[3-MARKS]**

क- आदित्यः -अभिनव! किं ---------------क्रीडितुं गच्छसि?

(क)त्वया (ख) त्वम (ग) अहम

ख- अभिनवः- न ---------- तु गणितस्य अभ्यासः क्रियते।

(क)त्वया (ख) अहम (ग) मया

ग- अभिनवः - न, मया तु स्वपाठः----------------।

(क)पठयते (ख) पठामि (ग) पठयसे

घ- आदित्यः शोभनम! त्वं -----------अपि लिखसि किम?

(क)निबन्धः (ख)निबन्धम (ग) निबन्धेन

**प्र-5 प्रदतेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत- (केवलं प्रश्नचतुष्टयम)** **[4-MARKS]**

क- प्रणवः रात्रौ 8:45 वादने----------- दूरदर्शनं पश्यति।

(क)सार्ध-अष्टवादने (ख) सपाद-अष्टवादने (ग) पादोन-नववादने

ख- केशवः प्रातः 6:00 वादने-------------जागर्ति।

(क) सार्ध-षडवादने (ख) सपाद-षडवादने (ग) षडवादने

ग- सायं 4:30 वादने ------------निनादः अतिरिक्तकक्षायै गच्छति।

(क)सपाद-चतुर्वादिने (ख) सार्ध-चतुर्वादिने (ग) पादोन-चतुर्वादिने

घ- कपिलः प्रातः 7:30 वादने -------------विद्यालयं गच्छति।

(क)सार्ध-सप्तवादने (ख) सपाद- सप्तवादने (ग) पादोन-सप्तवादने

ङ- अहं सायं 5:30 वादने ------------ भ्रमणं करोमि।

(क)सार्ध-पञ्चवादने (ख) सपाद-पञ्चवादने (ग) पादोन-पञ्चवादने

**प्र-6 वाक्यानुगुणम उचिताव्ययपदं चिनुत । (केवलं प्रश्नत्रयम)** **[3-MARKS]**

क- दुर्वहम---------- जीवितं जातम।

(क)तत्र (ख) अत्र (ग) अन्यत्र

ख- -------------गणितस्य परीक्षा अभवत।

(क)उच्चैः (ख) शनैः (ग) ह्यः

ग- ------------- छात्राः पादपान सिञ्चन्ति।

(क)श्वः (ख) ह्यः (ग) इदानीम

घ- निर्जनस्थाने रोदनं -----------भवति।

(क)श्वः (ख) वृथा (ग) एव

**प्र-7 अधोलिखितवाक्येषु रेखाङ्कितपदम अशुद्धम अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम)** **[3-MARKS]**

क- आनन्दः ह्यः न <u>आगमिष्यति</u>।

(क)आगच्छत (ख) आगच्छति (ग) आगच्छन

ख- <u>वृक्षाणि</u> हरिताः सन्ति।

(क)वृक्षान (ख) वृक्षाः (ग) वृक्षौ

ग- भवान फलं <u>खाद</u>।

(क)खादसि (ख) खादन्तु (ग) खादतु

घ- सः ग्रामं <u>गच्छन्ति</u>।

(क)गच्छसि (ख) गच्छतः (ग) गच्छति

# पठितावबोधनम

**प्र-8 रेखाङ्कित- पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत- (केवलं प्रश्नपञ्चकम)** **[5-MARKS]**

क- बुद्धिमती<u>चपेटया</u> पुत्रौ प्रहतवती।

(क)का (ख) कदा (ग) कया

ख- मयूरस्य नृत्यं <u>प्रकृतेः</u> आराधना अस्ति।

(क) का (ख) कस्य (ग) कस्याः

ग- <u>महानगरेषु</u> वाहनानाम अनन्ताः पङ्क्तयः धावन्ति।

(क)कस्य (ख) कुत्र (ग) केषाम

घ- करुणापरो गृही <u>तस्म</u> आश्रयं प्रायच्छत।

(क) कस्मै (ख) कस्यै (ग) कैः

ङ- संसारे <u>विद्वांसः</u> ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते।

(क)काः (ख) के (ग) कः

च- <u>सुराधिपः</u> ताम अपृच्छत।

(क)कः (ख) किम (ग) का

**प्र-9 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम उचितार्थ चिनुत- (केवलं प्रश्नचतुष्टयम)**

**[4-MARKS]**

क- वृषः <u>जवेन</u> गन्तुम अशक्तः आसीत।

(क)तीव्रगत्या (ख) 'जव'इति अत्रेन (ग) मन्दं मन्दम

ख- <u>करी</u> च सिंहस्य बलं जानाति।

(क)करः (ख) सिंहः (ग) गजः

ग- नवमालिका <u>रसालं</u> मिलिता।

(क)वनम (ख) आम्रम (ग) वृक्षम

घ- मां निजगले बदठवा चल <u>सत्वरम।</u>

(क)मन्दम (ख) शीघ्रम (ग) शनैः

ङ- राजपुत्रस्य <u>भार्या</u> पुत्रद्वयोपेता पितृगृहं प्रति चलिता।

(क)माता (ख) सखी (ग) पत्नी

**प्र-10 भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नषटकम)**

**[6-MARKS]**

क- मार्गे गहनकानने एकं व्याघ्रं ददर्श अत्र 'वने' इत्यर्थे किं पर्यायपदं प्रयुक्तम?

(क)मार्गे (ख) गहने (ग) कानने

ख- "निमित्तमुद्दिश्य हि यः प्रकुप्यति, ध्रुवं स तस्यापगमे प्रसीदति" अस्मिन वाक्ये 'प्रकुप्यति ' इत्यस्य किं विलोमपदं प्रयुक्तम?

(क) ध्रुवम (ख) प्रसीदति (ग) निमित्तम

ग- "सः ऋषभः हलमूढवा गन्तुमशक्तः क्षेत्रे पपात" अत्र क्रियापदं किम?

(क)पपात (ख) ऊढवा (ग) अशक्तः

घ- "दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम" अस्मिन वाक्ये विशेष्यपदं किम?

(क) दुर्दान्तैः (ख) दशनैः (ग) अमुना

ङ- "तस्य मृतशरीरं राजमार्गे निकषा वर्तते" अत्र 'निकटे' इत्यर्थे किं पदं दत्तम?

(क) राजमार्गेम (ख) मृतशरीरम (ग) निकषा

च- "आदेशं प्राप्य उभौ प्राचलताम" अत्र कर्तृपदं किम?।

(क) आदेशम (ख) उभौ (ग) प्राप्य

छ- "कुद्धः सिंह :वानरं प्रहर्तुमिच्छति" अस्मिन वाक्ये किं विशेषणपदं प्रयुक्तम?

(क) कुद्धः (ख) सिंहः (ग) वाहनम

ज- "पिता यच्छति पुत्राय बाल्ये विधाधनं महत" अत्र विशेषणपदं किम?

(क) पिता (ख) महत (ग) विधाधनम

## 'आ'- भागः

## वर्णनात्मकाः प्रश्नाः [40-MARKS]

**प्र-11 अधोलिखितं गद्यांशं पठित्वा प्रदतप्रश्नानाम उत्तराणि संस्कृतेन लिखत।**

एकस्मिन नगरे द्वे मित्रे वसतः स्मः। एकस्य नाम सोमेशः आसीत अन्यस्य नाम धनेशः आसीत। सोमेशः विद्याम इच्छति स्म धनेशः च प्रभतं धनम। एकदा मित्रद्वयं विदेशम अगच्छत। तत्र सोमेशः परिश्रमेण अध्ययनं कृत्वा विद्यां प्राप्तवान। धनेशः बहु -धनसङ्ग्रहेणं कृतवान एवं अनेकानि वर्षाणि व्यतीतानि। तौ अचिन्तयताम -अधुना आवाम गृहं गच्छावः। गृहम प्रति आगमनसमये मार्गे चौराः आगच्छन। ते धनेशस्य सर्वम धनम अहरन। धनेशः दुःखी अभवत। सः रिक्तहस्त : गृहम आगच्छत। परन्तु सामेशः विद्याधनयुक्त : आसीत। विधाधनेन युक्तः सः शीघ्रम एव अतीव प्रसिद्धः अभवत। तस्य प्रसिद्धिम श्रुत्वा राजा विद्यावन्तम सोमेशम आहूय तस्य सम्मानम अकरोत। सः तस्मै मन्त्रिपदमपि अयच्छत। सत्यं एव कथ्यते - 'विद्या एव सर्वत्र पूज्यते'।

**अ- एकपदेन उत्तरत- (केवलं प्रश्नद्वयम)** **[2-MARKS]**

1- सोमेशः काम इच्छति?

2- द्वे मित्रे कुत्र वसतः स्म?

3- मार्गे के आगच्छन?

**आ- पूणवाक्येन उत्तरत- (केवलं प्रश्नद्वयम)** **[4-MARKS]**

1- सोमेशः कथम विद्यां प्राप्तवान?

2- सत्यं किम उक्तम?

3- धनेशः दुःखी किमर्थम आसीत?

**इ- अस्य अनुच्छेदनस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **[1-MARKS]**

**ई- यथानिर्देशम उत्तरत- (केवलं प्रशनदत्रयम)** **[3-MARKS]**

1- अचिन्ततताम इति कियापदस्य कर्तृपदं किम?

(क) धनेशः (ख) तौ (ग) सोमेशः

ख- 'सः तस्मै मंत्रीपदम अयच्छत' अत्र 'तस्मै' पदं कस्मै प्रयुक्तम ?

(क) सोमेशाय (ख) धनेशाय (ग) नृपाय

ग- 'प्रभूतम' कस्य पदस्य विशेषणपदम अस्ति?

(क) विदेशस्य (ख) परिश्रमस्य (ग) धनस्य

घ- 'शनैः' पदस्य विपर्ययम अनुच्छेदात चित्वा लिखत।

(क) शीघ्रम (ख) एकदा (ग) अतीव

## रचनात्मकं कार्यम

**प्र-12 भवान अभिनवः। भवान पितुः स्थानान्तरणवशात असमप्रदेशम आगतः। स्थानान्तरण-प्रमाणपत्रं प्राप्तुं प्रधानाचार्या प्रति लिखिते प्रार्थनापत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु।** **[5-MARKS]**

सेवायाम
माननीया (1)-----------
डी.ए.वी. विद्यालयः,
नवदेहली।

विषयः - स्थानान्तरण- प्रमाणपत्रं प्राप्तुं प्रार्थनापत्रम।

महोदये !
(2)---------- निवेदनम अस्ति यद अहं भवत्याः विद्यालये नवमकक्षायां (3)-----------। मम पितुः (4)--------------असमप्रदेशस्य गौहाटीनगरे सञ्जातम। ममःसम्पूर्णः परिवारः तत्रैव गत्वा निवासं (5)-------------- । अहम अपि (6)--------------सह गत्वा तत्रैव (7)--------------। अतः अहं प्रार्थये यत कृपया मह्यं स्थानान्तरणपत्रं (8)------------ अनुगृहणातु। भवत्याः (9)---------------कृपा भविष्यति। धन्यवादः।
भवत्याः (10)-------------शिष्यः

अभिनवः
नवमकक्षास्थः
अनुक्रमाङ्कः-3

दिनाङ्कः------------

**प्र-13 प्रदतं चित्रं दृष्टवा मञ्जूषायां प्रदतशब्दानां स्हायतया पञ्च वाक्यानि संस्कृतेन लिखत-** **[5-MARKS]**

मञ्जूषा-(अग्रजस्य, अनुजस्य, भगिनी, रक्षाबन्धनम, रक्षासूत्रम, मणिबन्धे, मिष्टानम, प्रसत्रौ, पर्वणः, बधाति।)



## अथवा

मञ्जूषा प्रदतशब्दानां साहाय्येन निम्नलिखितं विषयम अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकमअनुच्छेदं लिखत- **[5-MARKS]**

"दीपावलिः"

मञ्जूषा-

(दीपानां पङ्क्तिः, जनाः, रात्रौ, पूजयन्ति, प्रतीकम, मिष्टान्नम, वितरन्ति, स्फोटयन्ति, दीपमालिकोत्सवः, उल्लासमयम, अमावस्यायाम, उत्साहेन, बालकाः, अपि।)

प्र-14 अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-(केवलं प्रश्नपञ्चकम) **[5-MARKS]**

क- लता नाचती है। [Lata dances.]
ख- क्या मैं पढ़ूँ। [May I read.]
ग- मेरे पास पाँच फल हैं। [I have five fruits.]
ध- कल रमेश कहाँ था।[Where was Ramesh yesterday?]
ङ- रमा सीता के साथ पढ़े। [Rama study with sita]
च- अब तुम्हें पढ़ना चाहिए। [you should study now.]
छ- कृपया तुम मेरे लिए पानी लाओ। [please bring water for me]

प्र-15 अधोलिखितं गद्यांशं पठित्वा प्रदतमप्रश्नानाम उत्तराणि संस्कृतेन लिखत-

अस्ति देहलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्यो बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा बुद्धिमती एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्टवा धाष्टर्यात पुत्रौ चपेटया प्रहत्य जगाद- "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः?

अयमेकस्तावद्विभज्य भुज्यताम। प्रश्चाद अन्यो द्वितीयः कश्चिल्लक्ष्यते"। इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

अ- एकपदेन उत्तरत।(केवलं प्रश्नद्वयम) **[1-MARKS]**

क-कः भयाकुलचित्तो नष्टः?

ख- सा बुद्धिमती कुत्र एकं व्याघ्रं ददर्श?

ग- राजसिंहः कः आसीत?

आ- पूर्णवाक्येन उत्तरत।(केवलं प्रश्नद्वयम) **[2-MARKS]**

क- सा पुत्रौ चपेटया प्रहत्य किं जगाह?

ख- बुद्धिमती सा किमर्थ पितुर्गृहं प्रति चलिता?

ग- मार्गे सा बुद्धिमती किं ददर्श?

प्र-16 अधोलिखितं पद्यांशं पठित्वा प्रदतमप्रश्नानाम उत्तराणि संस्कृतेन लिखत-

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम।
शुचि पर्यावरणम।।
महानगरेमध्ये चलदनिशं कालायसचक्रम।
मनः शोषयत तनुः पेषयद भ्रमति सदा वक्रम।।
दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम। शुचि पर्यावरणम।।

अ- एकपदेन उत्तरत।(केवलं प्रश्नद्वयम) **[1-MARKS]**

क- अत्र किं दुर्वहं जातम?

ख- कदा महानगरे कालायसचकं चलति?

ग- पर्यावरणं कीदृश भवितव्यम?

आ- पूणवाक्येन उत्तरत।(केवलं प्रश्नद्वयम) **[2-MARKS]**

क- कालायसचक्रं किं कुर्वत वक्रं भ्रमति?

ख- केन जनग्रसनं न स्यात?

ग- का अस्मांक शरणम अस्ति ?

प्र-17 अधोलिखितं नाटयांशं पठित्वा प्रदतमप्रश्नानाम उत्तराणि संस्कृतेन लिखत-

मयूरः - (वृक्षोपरितः - साट्टहासपूर्वकम) विरम, विरम, आत्मश्रलाघाः। किं न जानासि यत-

यदि न स्यान्नरपतिः सम्यङनेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव।।

को न जानाति तव ध्यानावस्थाम। 'स्थितप्रज्ञ' इति व्याजेन वराकान मीनान छलेन अधिगृह्य क्रूरतया भक्षियसि। धिक त्वाम। तव कारणात तु सर्व पक्षिकुलमेवावमानितं जातम।

वानरः - (सगर्वम) अतएव कथयासि यत अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः।

मयूरः - अरे वानर! तूष्णीं भव। कथं त्वं योग्यंः वनराजपदाय? पश्यतु पश्यतु मम शिरसि राकमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः अतः वने निवसन्तं मां वनराजरुपेणापि द्रष्णुं सज्जाः भवन्तु अधुना। यतः कोडप्यन्यः विधातुः निर्णयम अन्यथा कर्तुं क्षमः।

काकः - (सव्यङग्यम) अरे अहिभुक! नृत्यातिरिक्त का तव विशेषता यत त्वां वनराजपदाय योग्यं मन्यामहे वयम।

**अ- एकपदेन उत्तरत।(केवलं प्रश्नद्वयम)** **[1-MARKS]**

क- कः सगर्व वदति?

ख- नाटयांशे कः श्लोकं वदति?

ग- 'अरे वानर! तूष्णीं भव।'इति कः कथयति?

**आ- पूर्णवाक्येन उत्तरत।(केवलं प्रश्नद्वयम)** **[2-MARKS]**

क- विधात्रा मयूरः कथं पक्षिराजः कृतः?

ख- काकः किं वदति?

ग- वानरः (सगर्व) किं वदति?

**प्र-18 मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत-** **[2-MARKS]**

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत।
परित्यज्य फलं पकं भुङ्क्तेऽपक्वं विमूढधीः।।

अन्वयः- यः (1)---------- वाचम त्यक्त्वा परुषाम वाचम (2)----------(सः) विमूढधीः पक्वम (फलम) (3)-----------उपक्वम फलम (5)----------।

**मञ्जूषा-**

(अभ्युदीरयेत, भुडक्ते, धर्मप्रदाम, परित्यज्य)

**<u>अथवा</u>**

मञ्जूषायाः साहाय्येन श्लोकस्यभावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-

काकः कृष्णः पिकः कृष्ण को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।।

भावार्थः- अस्य भावोऽस्ति यत -------- वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः--------- एव अस्ति। अतः पिके काके च कः भेदः अस्ति अर्थात वर्णदृष्टवा तयोः कश्चिद भेदो न दृश्यते। परन्तु यदा ----------- समयः आदच्छति तदा तयोः स्वररः ज्ञायते यत कः ------------- अस्ति कश्च पिको वर्तते।

**मञ्जूषा-**

(वसन्तस्य, काकस्य, काकः, कृष्णः)

प्र-19 अधोलिखित-कथांशं समुचित-क्रमेण लिखत- **[4-MARKS]**

क- एकः कृषकः आसीत।
ख- पुत्रस्य दैन्यावस्थां दृष्टवा सुरभिः दुःखिता अभवत।
ग- सुरभेः इमाम अवस्थां दृष्टवा सुराधिपः ताम अपृच्छत- 'अयि शुभे! किमेवं रोदिषि' इति
ध- कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।
ङ- तस्य समीपे द्वौ बलीवर्दौ आस्ताम।
च- क्रुद्धः कृषकः तमुत्थापयितुं ब्हुवारं यत्नमकरोत।
छ- सः वृषभः हलम ऊढवा गन्तुम अशक्तः क्षेत्रे पपात।
ज- तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत।